# SANSKRIT
# संस्कृतम्
## Paper – II
## प्रश्नपत्रिका – II

**Note :** This paper contains **fifty (50)** objective type questions, each question carrying **two (2)** marks. Attempt **all** the questions.

**सूचना** : अस्मिन् प्रश्नपत्रे पञ्चाशत्-परिमिता: **(50)** बहुवैकल्पिका: प्रश्ना: सन्ति । प्रत्येकम् प्रश्नस्य अङ्कद्वयं वर्तते । **सर्वे** प्रश्ना: समाधेया: ।

**1.** "उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्" अस्य मन्त्रस्य ऋषिर्वर्तते

(A) अग्नि:

(B) कण्व:

(C) दीर्घतमा:

(D) मधुच्छन्दा:

**2.** "दस्योर्हन्ता" को देव: ?

(A) इन्द्र:

(B) विष्णु:

(C) वरुण:

(D) कोऽपि न

**3.** "काण्व शाखा" कस्य वेदस्य ?

(A) सामवेदस्य

(B) यजुर्वेदस्य

(C) अथर्ववेदस्य

(D) ऋग्वेदस्य

**4.** "तस्य वयं प्रसवे याम उर्वी:" मन्त्रांशोऽयं कस्य सूक्तस्य वर्तते ?

(A) रुद्रसूक्तस्य

(B) विश्वामित्रनदीसूक्तस्य

(C) सरमा-पणि-सूक्तस्य

(D) यमयमीसूक्तस्य

**5.** "श्रिये गावो न धेनवोऽनवन्त" मन्त्रांशोऽयं वर्तते

(A) विश्वामित्र-नदी सूक्ते

(B) यम-यमी सूक्ते

(C) पुरुरवा-उर्वशी सूक्ते

(D) सरमा-पणि सूक्ते

**6.** वेदा अपौरुषेया: सन्ति-इति मतमस्ति

(A) मोक्षमूलरस्य

(B) महर्षि दयानन्दस्य

(C) विन्टरनित्सस्य

(D) सर्वेषामेव

**7.** आर्षेयब्राह्मणं केन वेदेन सम्बद्धम् ?

(A) सामवेदेन

(B) अथर्ववेदेन

(C) ऋग्वेदेन

(D) यजुर्वेदेन

**8.** कठोपनिषद् केन वेदेन सम्बद्धा ?

(A) ऋग्वेदेन

(B) अथर्ववेदेन

(C) कृष्णयजुर्वेदेन

(D) शुक्लयजुर्वेदेन

**9.** शिक्षाङ्गस्य को विषयः ?

(A) यज्ञः

(B) उपासना

(C) मोक्षः

(D) उच्चारणम्

**10.** "व्याकरणस्य कात्स्न्र्यम्" किमस्ति

(A) छन्दःशास्त्रम्

(B) निरुक्तम्

(C) ज्योतिषम्

(D) कल्पसाहित्यम्

**11.** अधोऽङ्कितानां समीचीनमुत्तरं चिनुत

| | |
|---|---|
| a. पुरुषविद्याऽनित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे | 1. ईशोपनिषद् |
| b. ओ३म् क्रतो स्मर | 2. ऋग्वेद |
| c. कौषीतकिब्राह्मणम् | 3. अथर्ववेद |
| d. शौनकसंहिता | 4. निरुक्तम् |

**Codes :**

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 4 | 1 | 2 | 3 |
| (B) | 1 | 4 | 3 | 2 |
| (C) | 3 | 4 | 2 | 1 |
| (D) | 1 | 2 | 4 | 3 |

**12.** कल्पग्रन्थेषु न गण्यते

(A) आपस्तम्बश्रौतसूत्रम्

(B) कात्यायनश्रौतसूत्रम्

(C) बौधायनधर्मसूत्रम्

(D) उणादिसूत्रम्

**13.** वेदकालविषये भारतीयपरम्परागतविचारं परिपोषयति

(A) मैक्षमूलरः

(B) वेबरः

(C) विण्टरनित्सः

(D) सायणः

**14.** सांख्याभिमतं प्रमाणत्रयं वर्तते

(A) प्रत्यक्षम्, अनुमानम्, उपमानम् ।

(B) प्रत्यक्षम्, उपमानम्, अर्थापत्तिः ।

(C) प्रत्यक्षम्, शब्दः, अनुपलब्धिः ।

(D) प्रत्यक्षम्, अनुमानम्, शब्दः ।

**15.** सांख्ये सत्कार्यवादस्वरूपमेवमस्ति

(A) सतो विज्ञानादसज्जायते इति ।

(B) सतो विवर्तभूतं कार्यजातं मिथ्यात्मकं जायत इति ।

(C) पूर्वमसत् कार्यं सदेव कारणात् सदात्मकं जायत इति ।

(D) पूर्वं सदेव कार्यं कारणात्मना पश्चाज्जायत इति ।

16. सांख्यमते सत्त्वगुणस्य स्वभावो विद्यते

(A) सुखात्मकः

(B) मोहात्मकः

(C) दुःखात्मकः

(D) अभावात्मकः

17. सांख्ये पंग्वन्धन्याये पङ्गुवद् वर्तते

(A) प्रधानम्

(B) पुरुषः

(C) गुणत्रयम्

(D) प्रलयः

18. सांख्यानुसारं नर्तकीव वर्तते

(A) प्रकृतिः

(B) माया

(C) सर्गः

(D) मनः

19. षष्टितन्त्रं किम् ?

(A) न्यायः

(B) वैशेषिकम्

(C) सांख्यम्

(D) वेदान्तः

20. दम उच्यते

(A) अन्तरिन्द्रियनिग्रहः ।

(B) विहितानां कर्मणां विधिना परित्यागः ।

(C) बाह्येन्द्रियनिग्रहः ।

(D) वेदान्तवाक्येषु विश्वासः।

21. वेदान्तसारे लिङ्गशरीराणि वर्णितानि

(A) षोडशावयवानि ।

(B) पञ्चदशावयवानि ।

(C) एकादशावयवानि ।

(D) सप्तदशावयवानि ।

22. विज्ञानमयकोशो भवति

(A) ज्ञानशक्तिमान् कर्तृरूपः।

(B) इच्छाशक्तिमान् कर्तृरूपः ।

(C) क्रियाशक्तिमान् कार्यरूपः ।

(D) क्रियात्मकत्वेन कार्यरूपः ।

23. निर्विकल्पकविषये कति विघ्नाः सम्भवन्ति वेदान्तमते

(A) त्रयः

(B) चत्वारः

(C) द्वौ

(D) पञ्च

24. 'वह्निरनुष्णः' इति स्थले हेत्वाभासो वर्तते

(A) सव्यभिचारः

(B) सोपाधिकः

(C) बाधितः

(D) आश्रयासिद्धः

25. परार्थानुमाने अवयवा भवन्ति

(A) त्रयः

(B) पञ्च

(C) षट्

(D) द्वौ

**34.** 'अक्षशौण्डः' - अस्य अलौकिकम् विग्रह वाक्यम् भवति

(A) अक्ष + सु शौण्ड + सु ।

(B) अक्ष + सुप् शौण्ड + सु ।

(C) अक्षेषु शौण्डः ।

(D) अक्ष + ङि शौण्ड + ङि

**35.** अल्पाच्तरम् । - इत्यस्य सूत्रस्य उदाहरणम् -

(A) शिवकेशवौ ।

(B) ईशकृष्णौ ।

(C) मातापितरौ ।

(D) हरिहरौ ।

**36.** भाषाविज्ञानदृशा अर्धस्वरो भवति

(A) उ

(B) अं

(C) व्

(D) ए

**37.** निम्नाङ्कितेषु ध्वनिनियमस्य प्रवर्तको न वर्तते

(A) ग्रिम (Grimm)

(B) ग्रासमान (Grassman)

(C) वेबर (Weber)

(D) वर्नर (Verner)

**38.** शकुन्तलायाः अङ्गुलीयकं कुत्र प्रभ्रष्टम् ?

(A) गङ्गातीर्थसलिले

(B) मालिनीनदीतीरे

(C) शचीतीर्थसलिले

(D) कण्वाश्रमे

**39.** प्रकरणस्योदाहरणं भवति

(A) मुद्राराक्षसम्

(B) वेणीसंहारम्

(C) मृच्छकटिकम्

(D) प्रतिमानाटकम्

**40.** 'हितं मनोहारि च दुर्लभं वचः' - कस्येयमुक्तिः ?

(A) युधिष्ठिरस्य

(B) द्रौपद्याः

(C) वनेचरस्य

(D) अर्जुनस्य

**41.** वीररसः अङ्गीरसः भवति अस्मिन् काव्ये

(A) नैषधीयचरिते

(B) शिशुपालवधे

(C) मेघदूते

(D) रघुवंशे

**42.** करुणस्य मूर्तिरथवा शरीरिणी - इदं वर्णनं कस्मिन् काव्येऽस्ति ?

(A) उत्तररामचरितम्

(B) अभिज्ञानशाकुन्तलम्

(C) मुद्राराक्षसम्

(D) रत्नावली

**43.** नैषधीयचरिते कति सर्गा: सन्ति ?

(A) अष्टादश

(B) एकोनविंशति:

(C) विंशति:

(D) द्वाविंशति:

**44.** अधस्तनयुग्मानां समीचीनां तालिकां चिनुत

a. किरातार्जुनीयम् 1. भास:

b. दशकुमारचरितम् 2. दण्डी

c. स्वप्नवासवदत्तम् 3. भारवि:

d. बुद्धचरितम् 4. अश्वघोष:

**कूट :**

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 4 | 3 | 2 | 1 |
| (B) | 2 | 1 | 3 | 4 |
| (C) | 3 | 2 | 1 | 4 |
| (D) | 1 | 4 | 3 | 2 |

**45.** पुण्यवर्मा कस्य देशस्य नृप आसीत् ?

(A) वत्सदेशस्य

(B) उज्जयिन्या:

(C) वाराणस्या:

(D) विदर्भदेशस्य

**46.** 'चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि' – कस्येयमुक्ति: ?

(A) मम्मटस्य

(B) विश्वनाथस्य

(C) वामनस्य

(D) दण्डिन:

**47.** संस्कृतनाटकेषु विदूषकस्य को वर्ग: ?

(A) ब्राह्मणवर्ग:

(B) क्षत्रियवर्ग:

(C) वैश्यवर्ग:

(D) शूद्रवर्ग:

**48.** 'लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्' श्लोकपादोऽयं कस्मिन् शास्त्रग्रन्थे वर्तते ?

(A) धर्मशास्त्रे

(B) अर्थशास्त्रे

(C) नाट्यशास्त्रे

(D) शिल्पशास्त्रे

**49.** मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थ: प्रतीयते....सा शक्ति: का ?

(A) अभिधा

(B) लक्षणा

(C) व्यञ्जना

(D) तात्पर्या

**50.** रसनिष्पत्तिविषये अनुमितिवादं क: प्रस्तौति ?

(A) भट्टलोल्लट:

(B) अभिनवगुप्त:

(C) भट्टनायक:

(D) श्रीशङ्कुक:

